560

14105

# I Semester B.B.A./B.B.A.M. Examination, December 2018
## (CBCS)
## LANGUAGE – SANSKRIT – I
## Raghuvamsham – V Canto, Grammar and Comprehension

Time : 3 Hours　　　　Max. Marks : 70

*Instructions : 1) Answer in **Sanskrit/Kannada/English**.*
*2) Answer Q. No. **I, V** and **VI** in **Sanskrit** only.*

1. समीचीनम् उत्तरं चिनुत ।

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select and write the correct answer. **(10×1=10)**

1) कालिदासेन महाकाव्यद्वयं रचितम् (एकं रघुवंशम्) अपरं किम् ?

1) किरातार्जुनीयम्　　2) कुमारसंभवम्
3) नैषधम्　　4) सेतुबन्धम्

2) इन्दुमती कस्य स्वसा ?

1) रघो:　　2) कौत्सस्य
3) भीष्मस्य　　4) भोजस्य

3) रघुवंशे कति सर्गा: सन्ति ?

1) नवदश　　2) त्रयोदश　　3) दश　　4) विंशति

4) सर्वस्वं दत्तवन्तं रघुं कौत्स: केन सह तुलनां करोति ?

1) शुष्कवृक्षेण　　2) नीवारस्तम्बेन
3) रिक्तेन मेघेन　　4) धनहीनेन दरिद्रेण

5) कौत्स: वरतन्तो: कति विद्या: प्राप्तवान् ?

1) द्वादश　　2) दश　　3) चतस्र:　　4) चतुर्दश

P.T.O.

6) रघु: कौत्सस्य वसतिं कुत्र चक्रे ?
1) शय्यागारे 2) अस्त्रागारे 3) अग्न्यागारे 4) धान्यागारे

7) ''साकेत:'' इति कस्या: नगर्या: नामधेयम् ?
1) अयोध्याया: 2) कौशाम्ब्या:
3) विदर्भस्य 4) उज्जयिन्या:

8) रघु: कौत्सप्रदेयं धनं कस्मात् लेभे ?
1) शिवात् 2) कुबेरात् 3) इन्द्रात् 4) भोजात्

9) कस्य कलाक्षय: श्लाघ्यतर: ?
1) सूर्यस्य 2) शिवस्य 3) हिमांशो: 4) इन्द्रस्य

10) रघो: कोषागारस्य मध्ये कीदृशी वृष्टि: पपात ?
1) सुवर्णमयी 2) राजतमयी 3) कांस्यमयी 4) ताम्रमयी

2. **द्वयो:** प्रश्नयो: उत्तरं लिखत ।
ಯಾವುದಾದರೂ **ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.
Answer **any two** of the following questions. **(2×10=20)**

1) ''रघुकौत्सौ साकेतपुरवासिनां प्रशंसापात्रम् अभवताम्'' कथम् ? विशदयत ।
''ರಘು ಮತ್ತು ಕೌತ್ಸರು ಸಾಕೇತಪುರವಾಸಿಗಳಿಗೆ ಪ್ರಶಂಸಾಪಾತ್ರರಾದರು'' ಹೇಗೆ ? ವಿಶದಪಡಿಸಿ.
Describe the events which led to the praising of Raghu and Kowtsa by the citizens of Saketapuri.

2) कालिदासस्य देश-काल-जीवन-कृतयश्च-प्रबन्ध लिखत ।
ಕಾಳಿದಾಸನ ದೇಶ-ಕಾಲ-ಜೀವನ-ಕೃತಿಗಳು - ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write an essay on Kalidasa's date, place, life and works.

3) आश्रमवासिनां योगक्षेमविषये रघु: कौत्सं किं पृष्टवान् ? विशदयत ।
ಆಶ್ರಮವಾಸಿಗಳ ಯೋಗಕ್ಷೇಮ ವಿಷಯದಲ್ಲಿ ರಘು ಮಹಾರಾಜನು ಕೌತ್ಸನನ್ನು ಏನೆಂದು ಪ್ರಶ್ನಿಸಿದನು ? ವಿಶದೀಕರಿಸಿ.
How did the king Raghu enquire Kowtsa about the welfare of the Rishis in hermitage ?

3. **त्रयाणां** श्लोकानाम् अनुवादं कृत्वा विवृणुत ।
ಯಾವುದಾದರೂ **ಮೂರು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದ ಸಹಿತ ವಿವರಿಸಿ.

Translate and explain **any three** shlokas. **(3×4=12)**

1) अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ।।

2) समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।

3) तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोष्यजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ।।

4) स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थम् ।।

5) सर्वत्र नो वार्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ।।

4. **वाक्यद्वयं** ससन्दर्भं विवृणुत ।
ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Annotate **any two** of the following : **(2×4=8)**

1) ''लोकेन चैतन्यमिवोष्णरश्मेः ।''

2) ''कलाक्षयः श्लाघ्यतरो हि वृद्धेः ।''

3) ''किं'' वस्तु विद्वन् गुरवे प्रदेयम् ।''

4) ''कोटीश्चतस्रो दश चाहरेति ।''

5. **संस्कृतभाषायामेव** उत्तरं लिखत । **(5×1=5)**

अ) **पञ्चानां** लिङ्ग-विभक्ति-वचनानि लिखत ।

| | | | |
|---|---|---|---|
| 1) क्षितीशम् | 2) पात्रे | 3) त्वया | 4) रघोः |
| 5) मृगीणाम् | 6) वनात् | 7) लोकस्य | 8) भवन्तम् |

आ) **पञ्चानां** लकार-पुरुष-वचनानि लिखत । **(5×1=5)**

| | | | |
|---|---|---|---|
| 1) उवाच | 2) कल्पेत | 3) आभासि | 4) आचचक्षे |
| 5) भवन्तु | 6) अभूताम् | 7) पठामि | 8) क्रीडन्ति |

6. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतभाषायां** लिखत । (5×2=10)

मानवजीवने छात्रजीवनं प्रशस्ततममस्ति । अस्मिन्नेव जीवने नरः भावीजीवनस्य निर्माणं करोति । इदं जीवनं चिन्ताशून्यम् आनन्दप्रदं चेति वदन्ति वृद्धाः । सिद्धान्तरूपेण आजन्मनः पञ्चविंशतिवर्षाणि यावत् छात्रजीवनं प्रसरति इति बुधैः स्वीक्रियते । अध्ययनकाले विद्यार्थी सततं महापुरुषैः सह संवदति, महाकवीनां काव्यरसं पीत्वा स्वात्मानं पवित्रीकरोति । सर्वथा अभिनन्दनीयम् इदं जीवनम् ।

प्रश्नाः

1) नरः कदा भावीजीवनस्य निर्माणं करोति ?

2) छात्रजीवनविषये वृद्धाः किं कथयन्ति ?

3) छात्रजीवनं कति वर्षाणि यावत् प्रसरति ?

4) अध्ययनकाले छात्राः कैः सह संवदन्ति ?

5) विद्यार्थी स्वात्मानं कथं पवित्रीकरोति ?